**- 30 -**

To escape imprisonment in a Jail or any imprisonment by kidnappers etc.

**Note :**

There is a "Ganesa Kavacham" in our Puranas. It is said that if one reads the entire Stotra 21 times a day for 21 days, one will be released from the Prison or Jail where he is imprisoned by the orders of the Government, king or a court of Justice. Even where a person who is in a prison or anybody (who is closely connected to the prisoner) on behalf of the prisoner reads or chants this stotra five times a day for 6 months to a year he will be able to get released from imprisonment.

*- 30 -*

## श्री गणेश कवचम्

वन्दे सिंहगतं विनायकममुं दिग्बाहुमाद्ये युगे
त्रेतायां तु मयूरवाहनममुं षड्बाहुकं सिद्धिदम् ।

द्वापरे तु गजाननं युगभुजं रक्ताङ्गरागं विभुं।
तिष्ये तु द्विभुजं सिताङ्गरुचिरं सर्वार्थदं सर्वदा ॥ 1 ॥

विनायकश्शिखां पातु परमात्मा परात्परः।
अतिसुन्दरकायस्तु मस्तकं सुमदोत्कटः ॥ 2 ॥

ललाटं काश्यपः पातु भ्रूयुग्मं तु महोदरः।
नयने फालचन्द्रस्तु गजास्यश्चोष्टपल्लवौ ॥ 3 ॥

जिह्वां पातु गणक्रीडश्चिबुकं गिरिजासुतः।
वाचं विनायकः पातु दन्तान् रक्षतु दुर्मुखः ॥ 4 ॥

श्रवणौ पाशपाणिस्तु नासिकां चिन्तितार्थदः ।
गणेशस्तु मुखं कण्ठं पातु देवो गणञ्जयः ॥ 5 ॥

स्कन्धौ पातु गजस्कन्धः स्तनौ विघ्नविनाशनः ।
हृदयं गणनाथस्तु हेरम्बो जठरं महान् ॥ 6 ॥

धराधरः पातु पार्श्वं पृष्ठं विघ्नहरश्शुभः ।
लिङ्गं गुह्यं सदा पातु वक्रतुंडो महाबलः ॥ 7 ॥

गणक्रीडो जानुजंघे ऊरू मंगलमूर्तिमान् ।
एकदन्तो महाबुद्धिः पादौ गुल्फौ सदावतु ॥ 8 ॥

क्षिप्रप्रसादनो बाहू पाणी आशाप्रपूरकः ।
अंगुळीश्च नखान्पादं हस्तौ पात्वरिनाशनः ॥ 9 ॥

सर्वांगानि मयूरेशो विश्वव्यापी सदावतु ।
अनुक्तमपि यत्स्थानं धूमकेतुस्सदावतु ॥ 10 ॥

आमोदस्त्वग्रतः पातु प्रमोदः पृष्ठतोऽवतु ।

प्राच्यां रक्षतु बुद्धीशः आग्नेय्यां सिद्धिदायकः ॥ 11 ॥

दक्षिणस्यामुमापुत्रः नैर्ऋत्यां तु गणेश्वरः ।

प्रतीच्यां विघ्नकर्ताऽव्यात् वायव्यां गजकर्णकः ॥ 12 ॥

कौबेर्यां निधिपः पायादीशान्याम् ईशनन्दनः ।

दिवाऽव्यादेकदन्तस्तु रात्रौ सन्ध्यासु विघ्नहृत् ॥ 13 ॥

राक्षसासुरवेताळग्रहभूतपिशाचतः ।

पाशाङ्कुशधरः पातु रजस्सत्त्वं तमस्स्मृतिम् ॥ 14 ॥

ज्ञानं धर्मं च लक्ष्मीश्च लज्जां कीर्तिं दयां कुलम् ।

वपुर्धनश्च धान्यं च गृहान्दारान्सखीन्सुतान् ॥ 15 ॥

सर्वायुधधरः पौत्रान्मयूरेशोऽवतात्सदा ।

कपिलोऽजाविकं पातु गवाश्वं विकटोऽवतु ॥ 16 ॥

त्रिसन्ध्यं जपते यस्तु वज्रसारतनुर्भवेत् ।

यात्राकाले पठेद्यस्तु निर्विघ्नेन फलं लभेत् ॥ 17 ॥

एकविंशतिवारं च पठेत्तावद्दिनानि यः ।

कारागृहगतं सद्यो राज्ञा बद्धं च मोचयेत् ॥ 18 ॥

राजदर्शनवेळायां पठेद्यस्तु त्रिवारतः ।

स राजानं वशं नीत्वा प्रकृतीश्च सभां जयेत् ॥ 19 ॥

इदं गणेशकवचं कश्यपेन समीरितम् ।

सर्वरक्षाकरं सर्वसर्वकामप्रपूरकम् ॥ 20 ॥

## Śrī Gaṇēśa Kavacham

Vandē Simhagatam Vināyakamamum
Digbāhumādyē Yugē
Trētāyām Tu Mayūravāhanamamum
Ṣadbāhukam Siddhidam

Dwāpare tu Gajānanam Yugabhujam
Raktānga Rāgam Vibhum
Tiṣyē tu Dvibhujam Sitāngaruchiram
Sarvārthadam Sarvadā 1

Vināyakaśśikhām Pātu
Paramātmā Parātparaḥ
Atisundarakāyastu
Mastakam Sumadōtkaṭah 2

Lalāṭam Kāśyapaḥ Pātu
Bhrūyugmam tu Mahōdaraḥ
Nayanē Phālachandrastu
Gajāsyaschōṣṭha pallavou 3

**Jihvām Pātu Gaṇakrīdaś**
**Chibukam Girijāsutaḥ**
**Vācham Vināyakaḥ Pātu**
**Dantān Rakshatu Durmukhaḥ 4**

**Shravanau Pāśapāṇistu**
**Nāsikām Chintitārthadah**
**Ganeśastu Mukham kanṭham**
**Pātu Dēvō Gaṇañjayaḥ 5**

**skandhou pātu Gajaskandhaḥ**
**stanou vighnavināśanaḥ**
**Hṛdayam Gananāthastu**
**Herambō jaṭharam Mahān 6**

**Dharādharaḥ Pātu Parśvam**
**Pruṣṭham Vighnaharaśśubhaḥ**
**Lingam guhyam sadā pātu**
**Vakratundō mahābalaḥ 7**

**Ganakridō Jānujanghē**
**Ūrū Mangalamūrtimān**
**Ēkadantō Mahābuddiḥ**
**Pādau gulphou Sadāvatu 8**

**Kshipraprasādanō bāhoo**
**Pāni Āshāprapoorakaḥ**
**Anguleeścha Nakhānpādam**
**hastau pātwarināśanaha 9**

**Sarvāngāni Mayooreśo**
**Viswavyāpi sadāvatu**
**Anuktamapi Yatsthānam**
**Dhoomakētussadāvatu 1 0**

**Āmodastvagratah pātu**
**Pramōdaḥ Pruṣhṭhatōvatu**
**Prāchyām Rakshatu Buddhiśaḥ**
**Āgneyyām siddhidāyakah 1 1**

**Dakshiṇasyāmumāputraḥ**
**Naiṛṛutyām tu Ganēsvaraḥ**
**Pratīchyām Vighnakartāvyāt**
**Vāyavyām Gajakarṇakaḥ 12**

**Koubēryām Nidhipaḥ Pāyāt**
**Esānyām Eeśanandanaḥ**
**Divāvyādēkadantastu**
**Ratrau Sandhyāsu Vignahṛt 13**

**Rākshasāsuravetāla**
**grha bhūtapiśāchataḥ**
**Pāśāṅkuśadharaḥ Pātu**
**Rajassatvam Tamassmṛutim 14**

**Gnānam Dharmam Cha Lakshmiñcha**
**lajjām keertim Dayām kulam**
**Vapurdhanancha Dhānyancha**
**Gṛuhāndārān sakhīn sutān 15**

**Sarvāyudhadharaḥ Poutrān**
**mayūrēśō (a)vatātsadā**
**Kapilō(a)jāvikam pātu**
**Gavāswam Vikatōvatu** **16**

**Trisandhyām Japate yastu**
**Vajrasāratanurbhavēt**
**Yātrākālē Paṭhedyastu**
**Nirvighnēna phalam labhēt** **17**

**Ēkavimśativāram cha**
**Paṭhettāvaddināni yaḥ**
**Kāragṛuhagatam sadyō**
**Rājnā baddham cha mōchayēt** **18**

**Rājadarshanavēlāyām**
**paṭhēd yastu Trivārataḥ**
**Sa Rājānam vaśam Nītvā**
**Prakṛutīscha Sabhām Jayēt** **19**

**Idam Ganēśa kavacham**
**kaśyapēna Samiritam**
**Sarvarakshākaram Sarva**
**Sarva Kāmaprapoorakam** **20**

***- 31 -***

A Universal remedy (panacea) for all ills, problems, diseases etc.,

**VISHNU SAHASRANAMA STOTRAM** is considered by all sages as a very potent Mantra which, if chanted daily is capable of bestowing all types of happiness, prosperity, good health etc. The various benefits accruing have been enumerated in the last portion called Phala Sruti. The book is available in R.K. Mission / Math Book Stalls / Gita Press, Gorakhpur Publication etc., in cheap editions. Cassettes sung by late M.S. Subbalakshmi and others with the best and clear pronunciation are also available.